piece of cloth. अयं समुदायस्य कार्यसाधकविवक्षायां प्रवर्तते। यथा तन्तवः सूत्राणि बहूनि मिलितानि कार्यं साधयन्ति तथा महान्तोऽपि मिलिताः स्वकार्यं साधयन्तीति भावः। लौ. न्याय.

**तप्तं तप्तेन संबध्यते** Hot goes with hot. Like loves like. cf. साधारणोऽयमुभयोः प्रणयः स्मरस्य तप्तेन तप्तमयसा घटनाय योग्यम्। V. 2. 16; अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु। R. 8. 43.

**तप्तपरशुग्रहणन्यायः** The maxim of taking hold of the heated axe. This is one of the ordeals prescribed to prove one's guiltlessness or otherwise in ancient India. cf. पुरुषं सोम्योत हस्तगृहीतमानयन्ति......। स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसंधोऽनृतेन आत्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते। Ch. Up. 6. 16.

**तस्करकन्दुन्यायः** The simile of a thief (who engaged himself) as a cook. His inability to perform the duties, however, led to his discovery and arrest. This is intended to teach the folly of undertaking to do something quite beyond our powers. अशक्ये विनियुक्तोऽपि कृष्णलान् श्रपयेदिति। सर्वात्मनाप्यसौ कुर्वन् कुर्यात् तस्करकन्दुवत्॥ सुरेश्वर.

**तिलतण्डुलन्यायः** The simile of rice and sesamum seeds. It is used to illustrate an easily distinguishable union of two or more things (संसृष्टि), in contradistinction to the more intimate and indistinguishable union (संकर) exemplified by the commingling of milk and water. See क्षीरनीरन्याय.

**तुलायष्टिन्यायः** The maxim of the horizontal beam of a balance. It is used to illustrate that a slight addition or subtraction of weight disturbs the balance. The तुलायष्टि figuratively suggests खलजनस्वभाव. स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्। अहो सुसदृशी चेष्टा तुलाकोटेः खलस्य च॥ H. 1. 150.

**तुलोन्नमनन्यायः** The simile of the raising [with the hand, one scale] of a balance. Naturally the other scale goes down, so the simile is used to illustrate the bringing about of two or more results by one operation.

**तुषकण्डनन्यायः** The simile of the grinding of chaff. It is used, like पिष्टपेषणन्याय, of an unnecessary and useless effort. अविचारयतो युक्तिकथनं तुषकण्डनम्। नीचेषूपकृतं राजन् वालुकास्विव मूत्रितम्॥ H. 4. 13.

**तुष्यतुदुर्जनन्यायः** The simile, let the wicked be pleased! Though the opponent's argument is fallacious, the सिद्धान्तिन् accepts it seriously for the sake of argument, saying let the devil be pleased, and then demolishes it thoroughly.

**तृणभक्षणन्यायः** The custom of taking grass in the mouth (literally of eating grass) as a token of submission. cf. Marāṭhī 'दांतीं तृण धरणें.' There is a reference to this custom in Hch. वैरिणोऽपि हि मुच्यन्ते प्राणान्ते तृणभक्षणम्। तृणाहाराः सदैवैते हन्यन्ते पशवः कथम्॥ प्रबन्धचिन्तामणि.

**तृणारणिमणिन्यायः** The simile of straw, araṇi wood, and the burning gem [as means of producing fire]. The kind of fire produced by each varies; and the method of production, too, is different; that being in one case blowing, in another attrition, and in the third the rays of the sun. एवं यत्र कार्यकारणबाहुल्यं कार्यतावच्छेदकं कारणतावच्छेदकं च नाना तत्रास्य प्रवृत्तिः। वाचस्पत्य.

**त्यजेदेकं कुलस्यार्थे** One should abandon an individual for the sake of a whole family. Sacrifice of the lower one for the higher one! त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥ H. 1. 115.

**दण्डापूपिकान्यायः** The maxim of the stick and the cakes. When a stick and cakes are tied together, and one says that 'the stick has been pulled down or eaten by a rat,' we are naturally led to expect that the cakes also have been pulled down or eaten by the rat, as a matter of course, the two being so closely connected together; so, when one thing is closely connected with another in a particular way and we say something of the one, it naturally follows that what we assert of the one can, as a matter of course, be asserted of the other. cf. मूषिकेण दण्डो भक्षित इत्यनेन तत्सहचरितमपूपभक्षणमर्थादायातं भवतीति नियतसमानन्यायादर्थान्तरमापततीत्येष न्यायो दण्डापूपिका। S. D. 10.

**दण्डिन्यायः** The simile of a man with a stick [or, men with sticks]. cf. Mbh. 8. 2. 83. This resembles छत्रिन्याय. Read: दण्डिनो गच्छन्तीत्यत्र तु दण्ड्यदाण्डिषु समूहिषु लक्ष्यमाणेषु तदन्तर्गतस्याविशेषाद् दाण्डिशब्दार्थस्य परिग्रहः। तत्त्वबिन्दु.

**देवदत्तहन्तृहतन्यायः** The illustration of the slaying of the murderer of देवदत्त. The point is that the death of the murderer does not bring his victim to life again. न ह्यन्यस्यासिद्धत्वादन्यस्य प्रादुर्भावो भवति। न हि देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति। Mbh. 1. 1. 57.

**दृष्टिसृष्टिन्यायः** The maxim of the creation while we are awake. प्रजापतेः स्वापकाले तत्कल्पितः स्थावरजङ्गमप्रपञ्चः सर्वोऽपि तदीयेऽज्ञानेऽव्याकृताख्ये लीयते रात्र्यागमे। तथा दिवसागमे पुनस्तत एव यथापूर्वमाविर्भवतीति। एवं दृष्टिसृष्टिन्यायेनास्मत्कल्पितोऽप्ययं वियदादिप्रपञ्चोऽस्मत्सुषुप्तौ लीयतेऽस्मत्प्रबोधे यथापूर्वं प्रादुर्भवतीति। लौ. न्याय.

**दृष्टे संभवति अदृष्टकल्पना न न्याय्या** When a thing is established by a direct proof, there is no scope for unseen idea. प्रत्यक्षप्रमाणसिद्धे कार्ये अप्रत्यक्षकल्पना न कार्या तस्या अयोग्यत्वादिति। लौ. न्याय.; दृष्टे संभवत्यदृष्टकल्पनानवकाश इति न्यायेन धर्मजिज्ञासाधिकरणे अध्ययनविधिः फलवदर्थावबोधरूपदृष्टान्त इति सिद्धार्थः। बालमीमांसाप्रकाश; दृष्टे सति अदृष्टकल्पना निष्प्रमाणिका। तन्त्र. 1. 3. 2-4; विक्रयो हि श्रूयते, शतमधिरथं दुहितृमते दद्याद् आर्षे गोमिथुनमिति। न चैतद् दृष्टार्थे सति आनमनेऽदृष्टार्थं भवितुमर्हति। ŚB. on MS. 6. 1. 10.

**देहलीदीपन्यायः** The maxim of a lamp on the threshold. A lamp so placed gives light both inside and